ततो दैवतमुद्दिश्य काममुद्दिश्य चात्मनः ।
छेदयेत्तेन खड्गेन बलिं पूर्व्वाननं तु तम् ॥
अथवोत्तरवक्त्रं स्वयं पूर्व्वमुखस्तथा ।
पूर्व्वोक्तान् सैन्धवादींस्तु रक्ते वस्त्रं नियोजयेत् ॥
सौवर्णं राजतं ताम्रं रैत्यं पत्रपुटञ्च वा ।
माहेयं कांस्यमथवा यज्ञकाष्ठमयञ्च वा ।
पात्रं रुधिरदानाय कर्त्तव्यं विभवावधि ॥
न लौहे वाल्कले वापि रैत्ये वाङ्गेऽथ सैसके ।
दद्याद्रक्तं बलीनान्तु भूमौ स्रुचि स्रुवेऽथवा ॥
न घटे भूतले नापि न क्षुद्रे पानभाजने ।
रुधिराणि प्रदद्यात्तु भूतिकामो नरोत्तमः ॥
नरस्य तु सदा रक्तं माहेये तैजसेऽथवा ।
दद्यान्नरपतिस्तत्तु न पुटादौ कदाचन ॥*॥
हयमेधन्तते दद्यान्न कदाचिद्धयं बलिम् ।
तथा दिक्पालमेधेषु गजं दद्यान्नराधिपः ॥
न कदाचित्तथा देव्यै प्रदद्याद्धयहस्तिनौ ।
हयाकर्षे चामरन्तु बलिं दद्यान्नराधिपः ॥
सिंहं व्याघ्रं नरञ्चापि स्वगात्ररुधिरन्तथा ।
न दद्याद्ब्राह्मणो मद्यं तथा देव्यै कदाचन ॥
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ।
इहापि स्यात् स हीनायुः सुखसौभाग्यवर्जितः ॥
स्वगात्ररुधिरं दत्त्वा चात्महत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥
न कृष्णसारं वितरेद्बलिन्तु क्षत्त्रियः क्वचित् ।
दत्त्वः कृष्णसारन्तु ब्रह्महत्या भवेद्ध्रुवम् ॥
यत्र सिंहस्य व्याघ्रस्य नरस्य विहितो वधः ।
ब्राह्मणोक्ते तु बल्यादौ तत्रायं विहितः क्रमः ॥
कृत्वा घृतमयं व्याघ्रं नरं सिंहञ्च भैरव ! ।
अथवा पूपविरचितं यवचूर्णमयं वा ।
घातयेच्चन्द्रहासेन तेन मन्त्रेण संस्कृतम् ॥*॥
प्रभूतबलिदाने तु द्वौ वा त्रीन् वाग्रतः कृतान् ।
पूजयेत् प्रमुखान् कृत्वा सर्व्वान् तन्त्रेण साधकः ।
सामान्यपूजा कथिता बलीनां पूर्व्वतो मया ।
विशेषो यत्र यत्रास्ति तन्मत्तः शृणु भैरव ! ॥*॥
महिषं प्रददौ देव्यै भैरव्यै भैरवाय वा ।
अनेनैव तु मन्त्रेण तथा तं पूजयेद्बलिम् ॥
यथा वाहं भवान् देवि यथा वहसि चण्डिकाम् ।
तथा मम रिपून् हिंस शुभं वह लुलायक ! ॥
यमस्य वाहनस्त्वन्तु वररूपधराव्यय ! ।
आयुर्व्वित्तं यशो देहि कासराय नमोऽस्तु ते ॥
खड्गस्य तु यदा दानं क्रियते तत्र मन्त्रणम् ।
जलेनाभ्युक्ष्य कुर्व्वीत गुहाजातेति भावयन् ॥
दैवे पित्रे च सुभगः खड्गस्त्वं खड्गसन्निभः ।
छिन्धि विघ्नान् महाभाग ! गुहाजात नमोऽस्तु ते ।
प्रदाने कृष्णसारस्य मन्त्रोऽयं परिकीर्त्तितः ।
कृष्णसार ! ब्रह्ममूर्त्ते ब्रह्मतेजोविवर्द्धन ।
चतुर्व्वेदमयः प्राज्ञः प्रज्ञां देहि यशो मम ॥*॥
तथा सरभपूजायां मन्त्रमेतत् प्रकीर्त्तितम् ।
त्वमष्टपादो विभ्रंशचन्द्रभागसमुद्भव ! ।
अष्टमूर्त्ते महाभाग भैरवाख्य नमोस्तु ते ॥
यथा भैरवरूपेण वराहो निहतस्त्वया ।
तथा सरभरूपेण रिपुं विघ्नान्निसूदय ॥

हरिस्त्वं हररूपेण यथा वहसि चण्डिकाम् ।
तथाशुभानि मे नित्यं बहुविघ्नांश्च सूदय ॥
त्वं हरिः सिंहरूपेण जगत्प्रत्यूहरूपिणम् ।
जघान येन सत्त्वेन हिरण्यकशिपुं हरन् ।
दत्वेदं सिंहपूजायां क्रम उक्तो मयानघ ! ॥*॥
नरे स्वगात्ररुधिरे पर्य्यायं शृणु भैरव ! ।
पीठे चेद्दीयते मर्त्यं बलिं दद्यात् श्मशानके ॥
श्मशानं हेरुकाख्यञ्च तत्पूर्व्वं प्रतिपादितम् ।
कामाख्यानिलये शैले तत्स्थाने विद्धि तत्क्रमम् ॥
मम रूपं श्मशानन्तु भैरवाख्यन्तु कथ्यते ।
तस्मात्त्वं तपःसिद्धौ त्रिभागन्तु भविष्यति ॥
पूर्व्वांशे भैरवाख्ये तु समुतस्थितैर्नरस्य च ।
दक्षिणांशे शिरो दद्यात् भैरव्या सुखमालया ॥
रुधिरं पश्चिमांशे तु हेरुकाख्ये नियोजयेत् ।
दत्त्वा संपूज्य च नरं विसृज्यागमनक्रमे ॥
पीठश्मशानेषु बलिं नैवेत्तु बलिदापकम् ।
अन्यत्रापि यतो यत्र दीयतेऽयं महाबलिः ॥
तत्राप्यन्यत्र चोत्सृज्य छित्त्वान्यत्र शिरोऽन्त-
तम् ।
निवेदयेत् साधकस्तु विसृज्य न विलोकयेत् ॥*॥
सुस्नातं मनुजं दोषं पूर्व्वाह्णे नियताशनम् ।
मांसमैथुनभोग्येन हीनं सक्चन्दनोक्षितम् ॥
उत्तरामुखं तन्तु तदङ्गेषु च देवताः ।
पूजयेत्तञ्च नाम्ना तु दैवतेन च मानुषम् ॥
ब्रह्मरन्ध्रेषु ब्रह्माणं तन्नासायाञ्च मेदिनीम् ।
कर्णयोस्तु तथाकाशं जिह्वायां सर्व्वतोमुखम् ॥
ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूजयेत् ।
ललाटे पूजयेच्चन्द्रं शक्रं दक्षिणगण्डतः ॥
वामगण्डे तथा वह्निं ग्रीवायां समवर्त्तिनम् ।
केशाग्रे निर्ऋतिं मध्ये भ्रुवोश्चापि प्रचेतसम् ॥
नासामूले च श्वसनं स्कन्धे चापि धनेश्वरम् ।
हृदये सर्पराजन्तु पूजयित्वा पठेदिदम् ॥
नरवर्य्य ! महाभाग सर्व्वदेवमयोत्तम ।
रक्ष मां शरणापन्नं सपुत्त्रवसुबान्धवम् ॥
सराज्यं मां सहापत्यं चतुरङ्गसमन्वितम् ।
रक्षन् परित्यज प्राणान् मरणे नियते सति ॥
महातपोभिर्दानैश्च यज्ञैर्यत् साध्यते नृणाम् ।
तन्मे देहि महाभाग ! त्वञ्चापि प्राप्नुहि श्रियम् ॥
राक्षसाश्च पिशाचाश्च वेतालाद्याः सरीसृपाः ।
नृपाश्च रिपवश्चान्ये न मां ते घ्नन्तु त्वत्कृते ॥
त्वत्कण्ठनालगलितैः शोणितैरङ्गसंयुतैः ।
आप्यायस्वात्मवन्मत्वा मरणे नियते सति ॥
एवं संपूज्य विधिवत् पूर्व्वतन्त्रेण पूजयेत् ।
पूजितो मत्स्वरूपोऽयं दिक्पालाधिष्ठितो
भवेत् ॥
अधिष्ठितस्तथान्यैश्च ब्रह्माद्यैः सकलैः सुरैः ।
कृतपापोऽपि मनुजो निष्पापा स तु जायते ॥
तस्य निष्कलुषस्याशु पीयूषं शोणितं भवेत् ।
प्रीणाति च महादेवी जगन्माया जगन्मयी ॥
सोऽपि कायं परित्यज्य मानुषं न चिरान्मृतः ।
भवेद्गणानामधिपो ममापि बहुसत्कृतः ॥
इतोऽन्यथा पापयुतं मलमूत्रवसायुतम् ।

तं बलिं नहि गृह्णाति कामाख्यान्यापि नामतः ॥
अन्येषां महिषादीनां बलीनामथ पूजनात् ।
कायो मेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ॥
अन्येभ्योऽपि च देवेभ्यो यदा यद्यत् प्रदीयते ।
तदर्च्चितं प्रदद्यात्तु पूजिताय सुराय वै ॥*॥
काणं व्यङ्गचातिवृद्धं रोगिणञ्च गलव्रणम् ।
क्लीवं हीनाङ्गमथवा वृद्धलिङ्गं गलद्व्रणम् ॥
श्वित्रिणञ्चातिह्रस्वञ्च महापातकिनन्तथा ।
अष्टादशाब्दवयोयं शिशुं सूतकसंयुतम् ॥
ऊर्द्ध्वं संवत्सराच्चापि महागुरुनिपातिनम् ।
बलिकर्म्मणि चैतांस्तु वर्ज्जयेत् पूजितानपि ॥
पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः ।
स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात् ॥*॥
संघातबलिदानेषु योषितं पशुपक्षिणोः ।
बलिं दद्यान्मानुषीन्तु त्यक्त्वा संघातपूजितम् ॥
न त्रिमासीयकान्यूनं पशुं दद्यात् शिवाबलिम् ।
न च त्रिपक्षकान्यूनं प्रदद्याद्वै पतत्त्रिणम् ॥
कारण्डाद्दिदुष्टन्तु न पशुं पक्षिणन्तथा ॥
देव्यै दद्याद्यथा मर्त्यं तथैव पशुपक्षिणौ ॥
छिन्नलाङ्गूलकर्णादि भग्नदन्तन्तथैव च ।
भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन ॥
न ब्राह्मणं बलिं दद्यात् चाण्डालमपि पार्थिव ! ।
नोत्सृष्टं द्विजदेवेभ्यो भूपतेस्तनयं तथा ॥
रणे न विजितं दद्यात्तनयं रिपुभूभृतः ।
स्वपुत्त्रं भ्रातरं चापि पितरञ्च विरोधिनम् ॥
विट्पतिञ्च न दद्यात्तु भागिनेयञ्च मातुलम् ।
अनुक्तान्नापि दद्यात्तु तथाज्ञातान् मृगद्विजान् ॥
उक्तालाभे प्रदद्यात्तु गर्द्दभञ्चोष्ट्रमेव च ।
लाभेऽन्येषां न वितरेद्व्याघ्रमुष्ट्रं खरन्तथा ॥
सम्पूज्य विधिवन्मर्त्यं पशुं पक्षिणमेव वा ।
संछिद्य चापि मन्त्रेण मन्त्रेणैव निवेदयेत् ॥*॥
नारं सद्यः शिरोरक्तं देव्याः सम्यङ्निवेदयेत् ।
छागन्तु वामतो दद्यान्महिषं वितरेत् पुरः ॥
पक्षिणं वामतो दद्यादग्रतो देहशोणितम् ।
क्रव्यादानां पशूनान्तु पक्षिणाञ्च शिरोऽस्रजम् ॥
वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः ।
कृष्णसारस्य कूर्म्मस्य खड्गस्य शशकस्य च ॥
ग्राहाणामथ मत्स्यानामग्र एव निवेदयेत् ।
सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च
दक्षिणे ॥
पृष्ठदेशे न दद्यात्तु शिरो वा रुधिरं बलेः ।
उपद्रवे रणे वापि यथेष्टं वितरेन्नरम् ॥
यः कश्चिद्राजपुरुषो नाप्यस्त्वपि कदाचन ।
बलिदानदिनात् पूर्व्वदिवसे तु बलिं नरम् ॥
मानस्तोकेतिमन्त्रेण दैवीसूक्तत्रयेण च ।
गन्धद्वारेत्यनेनापि खड्गशीर्षे निधाय च ॥
तस्मिन् खड्गे च गन्धादि दत्त्वा तेनाधि-
वासयेत् ॥
गन्धादिकन्तु खड्गस्थं गले तस्य प्रदापयेत् ॥
अम्बेऽम्बिकाति मन्त्रेण रौद्रेण भैरवस्य च ।
एवन्तु संस्कृते मर्त्ये देवी रक्षति तं बलिम् ।
न तस्य व्याधयश्चापि क्षुब्धता रजनौ न च ।